"सामर्थ्यं तनु कल्पते समुदये वित्तं कुटुम्बं ततो
विक्रान्तिं सहजं तृतीयभवने योधञ्च सञ्चिन्तयेत् ।
बन्धुं वाहसुखालयानपि ततो धीमन्त्रपुत्त्रांस्तत:
षष्ठेऽथ क्षतविद्विषौ मदगृहे कामं स्त्रियं वर्त्म च॥
रन्ध्रायुर्म्मृतयोऽष्टमे गुरुतपो भाग्यानि चित्तन्ततो
मानाज्ञास्पदकर्म्मणां दशमभे कुर्य्यात्ततश्चिन्तनम् ।
प्राप्त्यायावथ चिन्तयेद्भवगृहे ऋष्फे तु मन्त्रिव्ययौ
सौख्यस्वामियुतीक्षणैरुपचयस्तेषां क्षतिस्त्वन्यथा॥
इति द्वादशभावविवेक: ॥
अरातिव्रणयो: षष्ठे चाष्टमे मृत्युरन्ध्रयो: ।
व्ययस्य द्वादशस्थाने वैपरीत्येन चिन्तनम् ॥"
अरात्यादिभावापवाद: ॥
अथ तन्वादिद्वादशभावस्थग्रहफलम् ।
"लग्ने सूर्य्येऽचिरोगी शशिनि बलयुतो रूपवान् वित्तयुक्तो
भौमे वङ्ग: सुवाग्मी शशधरतनये सर्व्वशास्त्रार्थवेत्ता ।
जीवे दाता पवित्र: सुकविरथ गते भार्गवे मक्तलेश:
शौरौ कण्डूतिगात्रस्तमसि च नियतं वञ्चितो धर्म्महीन: ॥ १ ॥
वित्तेऽर्के चैव रोगी सततगदयुतो रात्रिनाथे धनाढ्यो
भौमे नित्यं प्रवासी क्षषिसुतधनवान् सोमपुत्त्रे प्रधान: ।
जीवे लक्ष्मीप्रमोदी विलसति भृगुजे दर्पित: क्षौनिकेत:
सौरौ दीनोऽति नित्यं तमसि च नियतं चौरिकावित्तिजीवी ॥ २ ॥
भ्रातर्य्यर्के सधर्म्म: स भवति नियतं भ्रातृहा रात्रिनाथे
हिंस्रो भौमेऽनुजानां सपदि वधकरो भूमिकावृत्तिजीवी ।
सौम्ये सत्यस्य हन्ता भवति सुरगुरौ कामदेवस्वरूप:
शुक्रे राज्याधिकारी रविजदनुजयोर्भ्रातृहन्ता धनाढ्य: ॥ ३ ॥
अर्के बन्धौ सुदु:खी स्वजनपरिहृत: शीतगौ जानुरोगी
भौमे कुग्रामवासी भवति शशिसुते भ्रातृपुत्त्रान्वितोऽपि ।
जीवे रत्नोपभोगी त्रिदशरिपुगुरौ सर्व्वसौख्याधिकारी
सौरौ गेहे निवासी भवति शशिरिपौ मन्दकर्म्मा कुचेल: ॥ ४ ॥
पुत्त्रस्थेऽर्के नरोऽसौ प्रथमसुतहत: सिंहराशौ सुपुत्त्र:
सोमे सर्व्वाधिकारी भवति धरणिजे पुत्त्रशोकाकुलोऽसौ ।
सौमेऽ सुस्थ: सुदेह: प्रचुरधनयुतो देवपूज्ये सुपुत्त्र:
कन्यायुक्तो हि शुक्रे रविजदनुजयो: पुत्त्रपौत्त्रैर्विहीन: ॥ ५ ॥
षष्ठेऽर्के शत्रुहन्ता रिपुगणरहित: क्षीणचन्द्रे गतायु:
पूर्णे शत्रुञ्च हन्याद्भवति धरणिजे हीनदेहोऽतिदीन: ।
सौम्ये शास्त्रार्थयुक्तस्त्रिदशपतिगुरौ राज्यसौख्योपभोगी
दैत्याचार्य्येऽतिरोगी रविजदनुजयो: पापभुङ् नित्यदु:खी ॥ ६ ॥
पत्न्यामर्के च जायापतिरतिविसुखी शीतरश्मौ सुपुत्त्र:
सुखी भूयान्नरोऽसौ भवति धरणिजे हीनभार्य्यश्च नूनम् ।
सौम्ये सुस्थ: सुदेहस्त्रिदशपतिगुरौ शास्त्रवेत्ता शतायु: ।
शुक्रे पुत्त्रप्रमोदी रविजदनुजयोर्हीनभार्य्यश्च नूनम् ॥ ७ ॥
मृत्यौ चार्के सन्मृत्युर्भवति च नियतं शीतरश्मौ गतायुर्भूमे: पुत्त्रे सुरोगी शशधरतनये शूलरोगी विकर्म्मा ।
जीवे तीर्थे च मृत्युर्भवति भृगुसुते धार्म्मिकस्तीर्थगोऽसौ
सौरौ शूली गतायुर्भवति विधुरिपौ वेदसक्तो गतायु: ॥८॥
धर्म्मे चार्के नरोऽसौ विविधधनयुत: शीतगौ पुण्यकर्म्मा
लक्ष्मीवान् पुण्यचेता भवति धरणिजे देववित्तापहारी ।
सौम्ये धर्म्मज्ञ: सुशीलस्त्रिदशपतिगुरौ राजतुल्य: सुकर्म्मा
शुक्रे तीर्थानुरागी रविजदनुजयो: पापशील: सुदु:खी ॥९॥
कर्म्मण्यर्के प्रतापी प्रचुरधनयुत: शौपदी क्रोधदृष्टि:
सोमे शोकान्वितोऽसौ विविधधनयुतो भूमिजे बन्धुहीन:।
नित्योत्साही च सौम्ये प्रचुरधनयुतो देवपूज्येऽभिमानी
दिव्यस्त्रीशोऽपि शुक्रे नृपतिसमधन: सौरिदैत्ये सुखी च ॥१०॥
आये चार्के नरोऽसौ पितृधनसहित: शीतगौ चारुशीलो
भौमे नित्यं स रोगी शशधरतनये सर्व्वदा क्रोधयुक्त: ।
जीवे श्रीमान् प्रदाता करितुरगपतिर्भार्गवे शास्त्रविज्ञ:
छत्री रत्नादियुक्तो रविजदनुजयो: क्रूरकर्म्मा कुचेल: ॥११॥
अर्के संस्थे व्ययेऽसौ पुरधनरहित: सर्व्वरोगी सुदु:खी
सोमे खेदान्वितोऽसौ भवति धरणिजे द्यूतरक्तो विबुद्धि: ।
सौम्ये धर्म्मार्थकारी दिनकररहिते देवपूज्येऽभिमानी
शुक्रे शास्त्रानुरागी रविजदनुजयो: क्रूरकर्म्मा कुचेल: ॥१२॥
इति ज्योतिस्तत्त्वम् ॥*॥
स्त्रीणां यौवनकाले स्वभावजाष्टाविंशत्यलङ्कारान्तर्गताङ्गजप्रथमालङ्कार: । यथा,—
"यौवने सत्त्वजास्तासामष्टाविंशतिसंख्यका: ।
अलङ्कारास्तत्र भावहावहेलास्त्रयोऽङ्गजा: ॥"
तत्र भाव: ।
"निर्व्विकारात्मके चित्ते भाव: प्रथमविक्रिया ॥"
जन्मत: प्रभृति निर्विकारे मनसि उद्बुद्धमात्रो विकारो भाव: । यथा,—
"स एव सुरभि: काल: स एव मलयानिल: ।
सैवेयमबला किन्तु मनोऽन्यदिव दृश्यते ॥"
इति साहित्यदर्पणे तृतीयपरिच्छेद: ॥*॥
भावस्य लक्षणान्तरं यथा,—
"शरीरेन्द्रियवर्गस्य विकाराणां विधायका: ।
भावा विभावजनितास्चित्तवृत्तय ईरिता: ॥
पुराणे नाट्यशास्त्रे च द्वयोस्तु रतिभावयो: ।
समानार्थतया चात्र द्वयमेक्येन लक्ष्यते ॥"*॥
पूर्व्वोक्तमानसविकाररूपभावस्य विवरणं यथा, रज:सत्त्वतमोमयश्चित्तविकारो भाव: । चित्तवृत्तिविशेषो भाव इत्यन्ये । अतएव मनोविकारो रत्यादिर्भाव उक्त: । भावयति जनयति रसान् भाव: अन् । तथा च भरत: ।
"नानाभिनयसम्बन्धान् भावयन्ति रसानिमान् ।
यस्मात्तस्मादमी भावा विज्ञेया नाटकोक्तिषु ॥"
भावाश्च त्रिविधा: स्थायिनो व्यभिचारिण: सात्त्विकाश्च । तत्र स्थायिनो यथा,—
"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयन्तथा ।
जुगुप्सा विस्मयश्चेति स्थायिभावा: प्रकीर्त्तिता: ॥
व्यभिचारिणो यथा,—
"निर्व्वेदग्लानिशङ्काख्यास्तथासूयामदश्रमा: ।
आलस्यञ्चैव दैन्यञ्च चिन्ता मोहो धृति: स्मृति:॥
व्रीड़ा चपलता हर्ष आवेगो जड़ता तथा ।
गर्व्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥
स्वप्नो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता ।
मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥
त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारिण: ।
त्रयस्त्रिंशदमी भावा: प्रयान्ति रससंस्थितम् ॥"
सात्त्विका यथा,—
"स्वेद: स्तम्भोऽथ रोमाञ्च: स्वरभङ्गोऽथ वेपथु: ।
वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मता इति॥
रत्यादय: स्थायिनोऽष्टौ निर्व्वेदाद्या व्यभिचारिणस्त्रयस्त्रिंशत् स्वेदादय: सात्त्विका अष्टौ चेति ऊनपञ्चाशद्भावा: पञ्चाशद्भावा इत्यन्ये । इत्यमरटीकायां भरत: ॥